अस्यार्थः। नाम श्रीकृष्णदासेत्यादि। मन्त्रः श्रीगुरोः सकाशात् मन्त्रग्रहणम्। यागः होमपूर्व्वकयथाविधिदीक्षाग्रहणमित्यर्थः। नव इज्याकर्म्माणि पूजासम्बन्धिकृत्यानि श्रवणादीनि पाद्मोक्तार्च्चनादीनि वा सर्व्वेषां तेषां पूजाङ्गत्वात्। तानि च तत्रैवोक्तानि। यथा,—
"अर्च्चनं मन्त्रपठनं यागयोगौ महात्मनः।
नामसङ्कीर्त्तनं सेवा तच्चिह्नैरङ्कनं तथा।
तदीयाराधनं चर्य्या नवधा भिद्यते शुभे!॥"
अर्थपञ्चकं चत्वारो चत्वारो धर्म्मादयः पुरुषार्थाः पञ्चमपुरुषार्थश्च भक्तिः। यद्वा पञ्चतत्त्वानि अनात्मात्मपरमात्मपरमेश्वरतद्भक्तानां याथार्थ्यानि। इति तट्टीका॥ *॥
एकान्तिता गारुड़े।
"एकान्तेन सदा विष्णौ यस्मादेवे परायणाः।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः॥"
तद्विज्ञानेनानन्यपरता एकादशे उद्धवप्रश्नोत्तरे।
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनन्यभावेन ते वै भागवता मताः॥"
भागवते। ११। ३। ५०।
"न कामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः॥"
सा च एकान्तिता चतुर्द्धा। तत्र धर्म्मानादरेण श्रीमदुद्धवप्रश्नोत्तर एव।
"आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च सत्तमः॥"
गीतायाञ्च।
सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
यदा यस्यानुगृह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम्॥"
अन्यसर्व्वनिरपेक्षता भागवते श्रीमद्भगवदुद्धवसंवादे ऐलोपाख्याने।
"सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।
निर्म्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः॥"
तत्रैव तृतीये श्रीकपिलदेवहूतिसंवादे।
"त एते साधवः साध्वि! सर्व्वसङ्गविवर्ज्जिताः।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥"
विघ्नाकुलत्वेऽपि मनोरतिपरता स्कान्दे।
"यस्य कृच्छ्रगतस्यापि केशवे रमते मनः।
न विच्युता च भक्तिर्वै स वै भागवतो नरः।
आपन्नस्य यस्येह भक्तिरव्यभिचारिणी।
नान्यत्र रमते चित्तं स वै भागवतो नरः॥"
प्रेमैकपरता च भागवते पञ्चमस्कन्धे श्रीऋषभदेवस्य पुत्त्रानुशासने।
"ये वा मयीशे कृतसौहृदार्था
जनेषु देहम्भरवार्त्तिकेषु।
गृहेषु जायात्मजरातिमत्सु
न प्रीतियुक्ता यावदर्थाश्च लोके॥"
इति मिश्रं धनं वा।
"त्रिधा प्रेमैकपरता प्रेम्नः स्यात्तारतम्यतः।
उत्तमा मध्यमा चासौ कनिष्ठा चेति भेदतः॥"
तत्रोत्तमा यथा एकादशे हरियोगेश्वरोत्तरे।
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
स्वेष्टदेवस्य भावं यः सर्व्वभूतेषु पश्यति।
भावयन्ति च तान्यस्मिन्नित्यर्थः सम्मतः सताम्॥"
तृतीये श्रीकपिलदेवहूतिसंवादे।
"मय्यनन्येन भावेन भक्तिं कुर्व्वन्ति ये दृढ़ाम्।
मत्कृते त्यक्तकर्म्माणस्त्यक्तस्वजनबान्धवाः॥"
एकादशे श्रीहरियोगेश्वरोत्तरे च।
"विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥"
तत्रैव मध्यममाह हरियोगेश्वरोक्तादेव।
"ईश्वरे तदधीनेषु वालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"
कनिष्ठता तत्रैव।
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥
श्रद्धया पूजनं प्रेमबोधकं भक्त इत्यपि।
प्रेम्णो हि करणात्तु खलं भक्तानपेक्षणात्॥
लक्षणानि च यान्यग्रे भक्तेर्लेख्यानि तान्यपि।
वन्दनादीनि विद्यन्ते येषु भागवता हि ते॥
एतानि लक्षणानीत्थं गौणमुख्यादिभेदतः।
ऊह्यानि लक्षणान्येवं विवेच्यानि पराण्यपि॥
ईदृग्लक्षणवन्तः स्युर्द्दुर्लभा बहवो जनाः।
दिष्ट्या हि मणयो यत्तु न वर्त्तन्ते इतस्ततः॥"
अतएवोक्तं मोक्षधर्म्मे नारदीये।
जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चयः॥"
इति श्रीहरिभक्तिविलासे १० विलासः॥

भगवान्, [त्] (भगः "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षसां भग इतीङ्गना॥" इत्युक्तलक्षणं षड़ैश्वर्य्यमस्त्यस्येति। भग + नित्ययोगे मतुप् मस्य वः।) पुं बुद्धः। इत्यमरः। १। १। १३॥ श्रीकृष्णः। यथा,—
"भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः॥
पुण्ये त्रि। इति मेदिनी॥ भगवत्स्वरूपं यथा,
"मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम!।
तदेतत् श्रूयतामत्र संबन्धे गदतो मम॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः।
परया त्वक्षरप्राप्तिरृग्वेदादिमयापरा॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम्।
व्याप्यव्याप्तं यतः सर्व्वं तं वै पश्यन्ति सूरयः॥
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिणा।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः॥
वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः।
एवं निगदितार्थस्य स तत्त्वं तस्य तत्त्वतः॥
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते।
मैत्रेय! भगवच्छब्दः सर्व्वकारणकारणे॥
संभर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः।
नेतागमयिता स्रष्टा गकारार्थस्तथा मुने!॥
ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षसां भग इतीङ्गना॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥
एवमेव महाबाहो! भगवानिति सत्तम!।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।
शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः॥
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥
ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥
अपि च।
"परमात्मा च भगवान् विष्वक्सेनो जनार्द्दनः।
तद्भक्तिमान् भागवतो नाल्पपुण्यैर्हि जायते॥
भगवच्छासनालम्बी भगवच्छासनप्रियः।
भगवद्भक्तिमास्थाय वत्स! भागवतो भव॥
भगवान् भूतभव्येशो भूतादिप्रभवोऽव्ययः।
भावेन तं भजस्वेशं भवभङ्गकरं हरिम्॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम्।
ततो भागवतो भूत्वा भवबन्धात् प्रमोक्ष्यसि॥"
इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनो नामाध्यायः॥ अन्यच्च।
"महतां क्षुद्रजन्तूनां सर्व्वेषां जीविनां सदा।
स्रष्टा पाता च शास्ता च भगवान् करुणानिधिः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः॥
षड़ैश्वर्य्यान्वितः। स च परमेश्वरः। तन्नामविशेषस्य सेवनं यथा,—
"अथ श्रीभगवन्नाम सदा सेवेत सर्व्वतः।
तन्माहात्म्यञ्च विख्यातं सङ्क्षेपाच्च लिख्यते॥
अथ श्रीभगवन्नामविशेषस्य च सेवनम्।
ऋषिभिः कृपयादिष्टं तत्तत्कामहतात्मनाम्॥"
अथकामविशेषेण श्रीभगवन्नामविशेषसेवामाहात्म्यम्। तत्र पापक्षयार्थं कौर्म्मे। यथा,—
"श्रीशब्दपूर्व्वं जयशब्दपूर्व्वं
जयद्वयाद्युत्तरतस्तथा हि।
त्रिः सप्तकृत्वो नरसिंहनाम
जप्तं निहन्त्यादपि विप्रहत्याम्॥"